# .. rakArAdi shrI rAmAShTottarashatanAmAvaliH ..

# ॥ રકારાદિ શ્રીરામાષ્ટોત્તરશતનામાવલિઃ ॥

Document Information

Text title : rakArAdi rAmAShTottarashatanAmAvaliH
File name : rakArAdirAma108nAmAvaliH.itx
Category : aShTottarashatanAmAvalI
Location : doc_vishhnu
Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA
Latest update : January 24, 2016
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ રકારાદિ શ્રીરામાષ્ટોત્તરશતનામાવલિઃ ॥

@@
શ્રી હયગ્રીવાય નમઃ ।
હરિઃ ૐ

ૐ રામાય નમઃ ।
ૐ રાજીવપત્રાક્ષાય નમઃ ।
ૐ રાકાચન્દ્રનિભાનનાય નમઃ ।
ૐ રાત્રિઞ્ચરાર્દિતક્ષોણિ પરિતાપવિનાશનાય નમઃ ।
ૐ રાજીવનાભાય નમઃ ।
ૐ રાજેન્દ્રાય નમઃ ।
ૐ રાજીવાસનસંસ્તુતાય નમઃ ।
ૐ રાજરાજાદિદિક્પાલમૌલિ માણિક્યદીપિતાય નમઃ ।
ૐ રાઘવાન્વયપાથોધિચન્દ્રાય નમઃ ।
ૐ રાકેન્દુસદ્યશસે નમઃ । ૧૦
ૐ રામચન્દ્રાય નમઃ ।
ૐ રાઘવેન્દ્રાય નમઃ ।
ૐ રાજીવરુચિરાનનાય નમઃ ।
ૐ રાજાનુજામન્દિરોરસે નમઃ ।
ૐ રાજીવવિલસત્પદાય નમઃ ।
ૐ રાજીવહસ્તાય નમઃ ।
ૐ રાજીવપ્રિયવંશકૃતોદયાય નમઃ ।
ૐ રાત્રિનવ્યામ્બુભૃન્મૂર્તયે નમઃ ।
ૐ રાજાંશુરુચિરસ્મિતાય નમઃ ।
ૐ રાજીવકરાય નમઃ । ૨૦
ૐ રાજીવધારિણે નમઃ ।
ૐ રાજીવજાપ્રિયાય નમઃ ।
ૐ રાઘવોત્સઙ્ગવિદ્યોતાય નમઃ ।
ૐ રાકેન્દ્વયુતભાસ્વરાય નમઃ ।
ૐ રાજિલેખાનભાઙ્કુરાય નમઃ ।
ૐ રાજીવપ્રિયભૂષણાય નમઃ ।
ૐ રાજરાજન્મણીભૂષણાય નમઃ ।
ૐ રારાજદ્ભ્રમરાલકાય નમઃ ।
ૐ રાજલેખાભસીમન્તાય નમઃ ।
ૐ રાજન્મૃગમદાઙ્કનાય નમઃ । ૩૦
ૐ રાજહીરલસચ્છ્રોત્રાય નમઃ ।

ૐ રાજીવકરગામૃતાય નમઃ ।
ૐ રત્નકાઞ્ચીધરાય નમઃ ।
ૐ રમ્યાય નમઃ ।
ૐ રત્નકાઞ્ચનકઙ્કણાય નમઃ ।
ૐ રણત્કાઞ્ચનમઞ્જીરાય નમઃ ।
ૐ રઞ્જિતાખિલભૂતલાય નમઃ ।
ૐ રારાજત્કુન્દરદનાય નમઃ ।
ૐ રમ્યકણ્ઠાય નમઃ ।
ૐ રતવ્રજાય નમઃ । ૪૦
ૐ રઞ્જિતાદ્ભુતગાધેયાય નમઃ ।
ૐ રાત્રિઞ્ચરસતીહરાય નમઃ ।
ૐ રાત્રિઞ્ચરભયત્ત્રાતગાધેય સવનોત્તમાય નમઃ ।
ૐ રારાજચ્ચરણામ્ભોજરજઃપૂરમુનિપ્રિયાય નમઃ ।
ૐ રાજરાજસુહૃચ્ચાપભેદનાય નમઃ ।
ૐ રાજપૂજિતાય નમઃ ।
ૐ રમારામાકરામ્ભોજ માલોન્મીલિતકણ્ઠમાય નમઃ ।
ૐ રમાકરાબ્જમારન્દબિન્દુમુક્તાફલાવૃતાય નમઃ ।
ૐ રત્નકઙ્કણનિધ્વાનમિષલ્લક્ષ્મીસ્તુતિશ્રુતયે નમઃ ।
ૐ રમાવામદૃગન્તાલિ વ્યાપ્તદુર્લક્ષ્યવિગ્રહાય નમઃ । ૫૦
ૐ રામતેજસ્સમાહર્ત્રે નમઃ ।
ૐ રામસોપાનભઞ્જનાય નમઃ ।
ૐ રાઘવાજ્ઞાકૃતારણ્યવાસાય નમઃ ।
ૐ રામાનુજાર્ચિતાય નમઃ ।
ૐ રક્તકઞ્જાતચરણાય નમઃ ।
ૐ રમ્યવલ્કલવેષ્ટિતાય નમઃ ।
ૐ રાત્ર્યમ્બુદજટાભારાય નમઃ ।
ૐ રમ્યાઙ્ગશ્રીવિભૂષણાય નમઃ ।
ૐ રણચ્ચાપગુણાય નમઃ ।
ૐ રક્તમુનિત્રાણપરાયણાય નમઃ । ૬૦
ૐ રાત્રિઞ્ચરગણપ્રાણહર્ત્રે નમઃ ।
ૐ રમ્યફલાદનાય નમઃ ।
ૐ રાત્રિઞ્ચરેન્દ્રભગિનીકર્ણનાસોષ્ટ્રભેદનાય નમઃ ।
ૐ રાતમાયામૃગપ્રાણાય નમઃ ।
ૐ રાવણાહૃતસત્પ્રિયાય નમઃ ।
ૐ રાજીવબન્ધુપુત્રાપ્તાય નમઃ ।

ॐ રાજદેવસુતાર્ધનાય નમઃ ।
ॐ રક્તશ્રીહનુમદ્વાહાય નમઃ ।
ॐ રત્નાકરનિબન્ધનાય નમઃ ।
ॐ રુદ્રરાત્રિચરાવાસાય નમઃ । ૭૦
ॐ રાવણાદિવિમર્દનાય નમઃ ।
ॐ રામાસમાલિઙ્ગિતાઙ્કાય નમઃ ।
ॐ રાવણાનુજપૂજિતાય નમઃ ।
ॐ રત્નસિંહાસનાસીનાય નમઃ ।
ॐ રાજ્યપટ્ટાભિષેચનાય નમઃ ।
ॐ રાજનક્ષત્રવલયવૃતરાકેન્દુસુન્દરાય નમઃ ।
ॐ રાકેન્દુકુણ્ડલચ્ચત્રાય નમઃ ।
ॐ રાજાંશૂત્કરચામરાય નમઃ ।
ॐ રાજર્ષિગણસંવીતાય નમઃ ।
ॐ રઞ્જિતપ્લવગાધિપાય નમઃ । ૮૦
ॐ રમાદૃગ્ગાલિકાલીલા નીરાજિત પદામ્બુજાય નમઃ ।
ॐ રામતત્ત્વપ્રવચનાય નમઃ ।
ॐ રાજરાજસખોદયાય નમઃ ।
ॐ રાજબિમ્બાનનાગાનનર્તનામોદિતાન્તરાય નમઃ ।
ॐ રાજ્યલક્ષ્મીપરીરમ્ભસમ્ભૃતાદ્ભુતકણ્ટકાય નમઃ ।
ॐ રામાયણકથામાલાનાયકાય નમઃ ।
ॐ રાષ્ટ્રશોભનાય નમઃ ।
ॐ રાજમાલામૌલિમાલામકરન્દપ્લુતાઙ્ઘ્રિકાય નમઃ ।
ॐ રાજતાદ્રિમહાધીરાય નમઃ ।
ॐ રાદ્ધદેવગુરુદ્વિજાય નમઃ । ૯૦
ॐ રાદ્ધભક્તાશયારામાય નમઃ ।
ॐ રમિતાખિલદૈવતાય નમઃ ।
ॐ રાગિણે નમઃ ।
ॐ રાગવિહીનાત્મભક્તપ્રાપ્યાય નમઃ ।
ॐ રસાત્મકાય નમઃ ।
ॐ રસપ્રદાય નમઃ ।
ॐ રસાસ્વાદાય નમઃ ।
ॐ રસાધીશાય નમઃ ।
ॐ રસાતિગાય નમઃ ।
ॐ રસનાપાવનાભિખ્યાય નમઃ । ૧૦૦
ॐ રામનામામૃતોદધયે નમઃ ।
ॐ રાજરાજીવમિત્રાક્ષાય નમઃ ।

ॐ રાજીવભવકારણાય નમઃ ।
ॐ રામભદ્રાય નમઃ ।
ॐ રાજમાનાય નમઃ ।
ॐ રાજીવપ્રિયબિમ્બગાય નમઃ ।
ॐ રમારામાભુજલતા કણ્ઠાલિઙ્ગનમઙ્ગલાય નમઃ ।
ॐ રામસૂરિહૃદમ્ભોધિવૃત્તિવીચીવિહારવતે નમઃ । ૧૦૮

॥ ઇતિ વિશ્વાવસુ ચૈત્રશુદ્ધ ચતુર્દશ્યાં
રામેણ લિખિતં રકારાદિ શ્રી રામનામાષ્ટોત્તરશતં
સમ્પૂર્ણમ્ શ્રી હયગ્રીવાર્પણમ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

.. rakArAdi shrI rAmAShTottarashatanAmAvaliH ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*